# ॥ शिवभक्तिकल्पलतिकास्तोत्रम् ॥

.. shivabhaktikalpalatikAstotram ..

sanskritdocuments.org

February 28, 2017

# .. shivabhaktikalpalatikAstotram ..

# ॥ शिवभक्तिकल्पलतिकास्तोत्रम् ॥

## Sanskrit Document Information

Text title : shivabhaktikalpalatikAstotram

File name : shivabhaktikalpalatikAstotram.itx

Location : doc_shiva

Author : abhinavanRisiMhabhAratIsvAmi

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 28, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 28, 2017

*sanskritdocuments.org*

# ॥ शिवभक्तिकल्पलतिकास्तोत्रम् ॥

श्रीगणेशाय नमः ॥

श्रीकान्तपद्मजमुखैर्हृदि चिन्तनीयं श्रीमत्क्व शङ्कर भगवच्चरणारविन्दम् ।
क्वाहं तदेतदुपसेवितुमीहमानो हा हन्त कस्य न भवाम्युपहासपात्रम् ॥ १॥

अद्राक्षमङ्घ्रिकमलं न तवेति यन्मे दुःखं यदप्यनवमृश्य दुरात्मतां स्वाम्
।
पादाम्बुजं तव दिदृक्ष इतीदृगागः पातोऽनले प्रतिकृतिर्गिरिशैतयोर्मे ॥ २॥

दौरात्म्यतो मम भवत्पददर्शनेच्छा मन्तुस्तथापि तव सा भजनात्मिकेति
।
स्यादीशितुर्मयि दयैव दयामकार्षीरश्मादिभिः प्रहृतवत्सु न किं बिभो त्वम्
॥ ३॥

दुःखानलोदरनिपातनधूर्वदेष्वेष्वर्थाङ्गनासुतमुखेष्वनुराग आगाः ।
स्यात्ते रुषे तव दयालुतया त्वदानत्याद्यैर्विभो तदवधूय बिभर्षि चास्मान्
॥ ४॥

ईशान रक्षितुमिमान्यदपेक्षसे त्वं नत्यादिकं तदपनेतुमतिप्रसङ्गम् ।
किं हीयते तदनुपाधिकृपालुता ते संवित्सुखस्य न हि ते प्रियमप्रियं वा ॥
५॥

अप्याहर प्रहर संहर वाग्वदस्य त्रातास्युपात्तममुना मम नाम हीति ।
एवं विभो तनुभृतामवनेऽत्युपायान्वेषी कथं परमकारुणिकोऽसि न त्वम् ॥
६॥

त्राता दयाजलनिधिः स्मृतिमात्रलभ्यः क्षन्तागसामिति भवद्यशसा हृतात्मा
।
स्वामस्मरन्बत मलीमसतामलज्जो भक्तिं भवत्यभिलषामि धिगस्तु यन्माम्
॥ ७॥

शर्माप्तिरार्तिविहतिश्च भवत्प्रसादं शम्भोर्विना न हि नृणां स च नान्तरा याम्
।
यस्यां विधिः श्वभुगपि क्षमते समं तां त्वद्भक्तिमिच्छतु न कः स्वविनाशभीरुः ॥ ८॥

भक्तिर्विभात्ययि महत्यपरं तु फल्ग्वित्येवं ग्रहो ननु भवत्कृपयैव लभ्यः ।
लब्धस्त्वसौ फलममुष्य लभे न किं वा तां हन्त ते तदयशो मम हृद्रुजा च ॥ ९॥

त्वद्भक्त्यसम्भवशुचं प्रतिकारशून्यामन्तर्वहन्निखिलमीश सुखं च दुःखम् ।
उद्बन्धलग्न इव दुःस्वतयैव मन्ये सन्तान्यतीति मयि हन्त कदा दयेथाः ॥ १०॥

भक्तिं भवत्यविहितां वहतस्तु तद्विशेषोपलम्भविरहाहितमस्तु दुःखम् ।
तस्याः प्रतीपततिभिर्हतिजं कथं वा दुःखं सहे मयि कदेश कृपा भवेत्ते ॥ ११॥

लग्नः कृतान्तवदनेऽस्मि लभे च नाद्याप्यच्छां रतिं त्वयि शिवेत्यवसीदतो मे ।
त्वद्विस्मृतिं कुविषयाभिरतिप्रचारैस्तन्वन् हि मां हसपदं तनुषे ब्रुवे किम् ॥ १२॥

बद्धस्पृहं रुचिरकाञ्चनभूषणादौ बालं फलादिभिरिव त्वयि भक्तियोगे ।
आशाभराकुलमहो करुणानिधे मामर्थान्तरैर्हृतधियं कुरुषे किमेवम् ॥ १३॥

तिक्तग्रहोऽधि मधुरं मधुरग्रहोऽधि तिक्तं यथा भुजगदष्टतनोस्तथाहम् ।
त्वय्यस्तरक्तिरितरत्र तु गाढमग्नः शोच्योऽश्मनोऽपि हि भवामि किमन्यदीश ॥ १४॥

त्वत्संस्मृतित्वदभिधानसमीरणादिसम्भावनास्पदममी मम सन्तु शोकाः ।
मा सन्तु च त्वदनुषक्तिमुषः प्रहर्षा मा त्वत्पुरःस्थितिपुषेश दृशानुपश्य ॥ १५॥

सम्पातनं ननु सुखेषु निपातनं वा दुःखेष्वथान्यदपि वा भवदेकतानम् ।
यत्कल्पयेर्ननु धिया शिव तद्विधेहि नावैम्यहं मम हितं शरणं गतस्त्वाम् ॥ १६॥

दुःखं प्रदित्सुरयि मे यदि न प्रदद्या दुःखापहं पुरहर त्वयि भक्तियोगम् ।
त्वद्भक्त्यलाभपरिचिन्तनसम्भवं मे दुःखं प्रदेहि तव कः पुनरत्र भारः ॥ १७॥

भक्त्या त्वयीश कति नाश्रुपरीतदृष्ट्या सञ्जातगद्गदगिरोत्पुलकाङ्गयष्ट्या ।
धन्याः पुनन्ति भुवनं मम सा न हीति दुःखेऽपि का नु तव दुर्लभता विधित्सा ॥ १८॥

त्वद्भक्तिरेव तदनवाप्तिशुगप्युदारा श्रीः सा च तावकजनाश्रयणे च लभ्या ।
उल्लङ्ध्य तावकजनान् हि तदर्थनागस्त्वय्याः सहस्व तदिदं भगवन्नमस्ते ॥ १९॥

सेवा त्वदाश्रयवतां प्रणयश्च तेषु सिध्येद्दृढो मम यथाऽऽशु तथा दयार्द्राम् ।
दृष्टिं तवार्पय मयीश दयाम्बुराशे मैवं विभो विमुखता मयि दीनबन्धो ॥ २०॥

गौरीसखं हिमकरप्रभमम्बुदाभं श्रीजानि वा शिववपुस्तव तज्जुषो ये ।
ते त्वां श्रिता वहसि मूर्घ्नि तदङ्घ्रिरेणुं तत्सेवनं मम कथं नु दयां विना ते ॥ २१॥

त्वद्भक्तिकल्पलतिकां कृपयार्पयेश मच्चित्तसीम्नि भवदीयकथासुधाभिः ।
तां वर्धय त्वदनुरागफलाढ्यमौलिं तन्मूल एव खलु मुक्तिफलं चकास्ति ॥ २२॥

निःस्वो धनागम इव त्वदुपाश्रितानां सन्दर्शने प्रमुदितस्त्वयि सान्द्रहार्दः ।
आलोकयन् जगदशेषमिदं भवन्तं कार्यस्त्वयेश कृपयाहमपास्तखेदः ॥ २३॥

यो भक्तिकल्पलतिकाभिधमिन्दुमौलेरेवं स्तवं पठति तस्य तदैव देवः ।
तुष्टः स्वभक्तिमखिलेष्टदुहं ददाति यां प्राप्य नारदमुखैरुपयाति साम्यम् ॥ २४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदभिनवनृसिंहभारतीस्वामिविरचितं शिवभक्तिकल्पलतिकास्तोत्रं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shivabhaktikalpalatikAstotram ..
was typeset using XƎLATEX 0.99996
on February 28, 2017

Please send corrections to *sanskrit@cheerful.com*